Serial Number

Roll No. ..............................

SET/सेट : **A**

Total No. of Questions : 23

Total No. of Printed Pages : 8

# T-0653

## हाईस्कूल मुख्य परीक्षा वर्ष - 2024

## High School Examination (Main) - 2024

## संस्कृत

## SANSKRIT

Time : 3 Hours ] [ Maximum Marks : 75

---

**निर्देशा :**

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।

**1** उचितं विकल्पं चित्वा लिखत – **1×6=6**

(i) 'बालकान्' इत्यस्मिन् पदे विभक्तिः अस्ति –

(अ) प्रथमा (ब) द्वितीया

(स) पञ्चमी (द) षष्ठी

(ii) 'धेनवः' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्



https://www.mpboardonline.com

(iii) 'नदीनाम्' इत्यस्मिन् पदे विभक्तिः अस्ति –

(अ) चतुर्थी (ब) पञ्चमी

(स) षष्ठी (द) सप्तमी

(iv) 'तस्मिन्' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

(v) 'अस्माभिः सर्वदा सत्यं वक्तव्यम्।' इत्यस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) अस्माभिः (ब) सर्वदा

(स) सत्यं (द) वक्तव्यम्

(vi) अधोलिखितेषु शब्देषु अव्ययपदं नास्ति –

(अ) तत्र (ब) सर्वत्र

(स) रमा (द) सदा

2 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत् – 1×6=6

(धावति, जननी, दुर्लभः, समलम्, सत्वरम्, जलम्, श्वेतः)

(i) 'श्वेतः अश्वः धावति।' इत्यस्मिन् वाक्ये ________ विशेषणपदं अस्ति।

(ii) 'जननी तुल्यवत्सला।' इत्यस्मिन् वाक्ये ________ विशेष्यपदं अस्ति।

(iii) 'सलिलम्' इतस्य पदस्य ________ पर्यायपदं अस्ति।

(iv) 'निर्मलम्' इत्यस्य पदस्य ________ विलोमपदं अस्ति।

(v) 'सुलभः' इत्यस्य पदस्य ________ विलोमपदं अस्ति।

(vi) 'शीघ्रम्' इत्यस्य पदस्य ________ पर्यायपदं अस्ति।



https://www.mpboardonline.com

3 युग्ममेलनं कुरूत – 1×6=6

| (अ) | | (ब) | |
|---|---|---|---|
| (i) | पुस्तकालयः | (क) | तत्पुरुषसमास |
| (ii) | निश्छलः | (ख) | यणस्वर सन्धिः |
| (iii) | सूर्योदयः | (ग) | द्वन्द्वसमास |
| (iv) | अनुरूपम् | (घ) | वृद्धि स्वर सन्धिः |
| (v) | चौरभयम् | (ङ) | गुण स्वर सन्धिः |
| (vi) | त्रिभुवनम् | (च) | निः + चलः |
| | | (छ) | बहुब्रीहिसमास |
| | | (ज) | अव्ययीभावसमास |
| | | (झ) | निः + छलः |
| | | (ञ) | कर्मधारयसमास |
| | | (ट) | दीर्घस्वर सन्धिः |
| | | (ठ) | द्विगुसमास |

4 एकपदेन उत्तरं लिखत – 1×6=6

(i) 'आदाय' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(ii) 'कथयितुम्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(iii) 'पा + क्त्वा' संयुज्य किम् पदं भविष्यति?

(iv) अनिशं महानगरमध्ये किं प्रचलति?

(v) दुर्बले सुते कस्याः अधिका कृपा भवति?

(vi) पिता पुत्राय बाल्ये किं यच्छति?

5 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षम् 'न' इति लिखत – 1×6=6

(i) 'लभते' इत्यस्मिन् पदे प्रथमपुरुषः अस्ति।

(ii) 'आसीत्' इत्यस्मिन् पदे बहुवचनम् अस्ति।

(iii) 'पिबति' इत्यस्मिन् पदे एकवचनम् नास्ति।

(iv) 'अपठत्' इत्यस्मिन् पदे लङ्लकारः अस्ति।

(v) 'निर्गच्छति' इति पदे निर् उपसर्गः अस्ति।

(vi) 'प्रत्युपकारः' इति पदे 'प्र' उपसर्गः अस्ति।



https://www.mpboardonline.com

(प्रश्न क्रमांकः 6 तः 10 पर्यन्तं प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत–)

6 कुशलवयोः वंशस्य कर्ता कः? 2

अथवा

बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता?

7 सुरभिः इन्द्रस्य प्रश्नस्य किमुत्तरं ददाति? 2

अथवा

अस्माभिः कीदृशः वृक्षः सेवितव्यः?

8 मयूरः कथं नृत्यमुद्रायां स्थितः भवति? 2

अथवा

अन्तेप्रकृतिमाता प्रविश्य सर्वप्रथमं किं वदति?

9 भूकम्पस्य केन्द्रबिन्दुः कः जनपदः आसीत्? 2

अथवा

समस्तराष्ट्रं कीदृशे उल्लासे मग्नम् आसीत्?

10 मीनः कदा दीनां गतिं प्राप्नोति? 2

अथवा

कानि पूरयित्वा जलदः रिक्तः भवति?

11 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरूत – (कोऽपि द्वे) 1×2=2

(i) धेनूनाम् माता सुरभिः आसीत्।

(ii) चातकः वने वसति।

(iii) मयूरस्य नृत्यं प्रकृतेः आराधना।



https://www.mpboardonline.com

**12** अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कोऽपि द्वे) $1 \times 2 = 2$

(i) भवान् कुतः भयात् पलायितः। ______ कः ______ कम् ______

(ii) किं कुपिता एवं भणति, उत प्रकृतिस्था? ______ कः ______ कम् ______

(iii) अनृतं वदसि चेत् काकः दशेत्। ______ कः ______ कम् ______

**13** प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितएकं लिखत। 2

**14** अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः – (कोऽपि द्वे) $1 \times 2 = 2$

(i) वृक्षेण पत्राणि पतन्ति।

(ii) गुरुम् नमः।

(iii) विद्यालयम् परितः वृक्षाः सन्ति।

**15** रिक्तस्थानानि पूरयत – (कोऽपि चत्वारि) $\frac{1}{2} \times 4 = 2$

(i) काकः ________ भवति।

(ii) भूकम्पित समये ________ गमनमेव उचितं भवति।

(iii) पर्यावरणस्य संरक्षणम् ________ प्रकृतेः आराधना।

(iv) ________ परभृत् अपि कथ्यते।

(v) ________ समयस्य सदुपयोगः करणीयः।

(vi) मयूरः ________ इति नाम्नाऽपि ज्ञायते।

**16** अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत – $\frac{1}{2} \times 4 = 2$

(i) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

(ii) मार्गे सा एकं व्याघ्रम् अपश्यत्।

(iii) प्रत्युत्पन्नमतिः सा शृगालम् आक्षिपन्ती।

(iv) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।



https://www.mpboardonline.com

17 वाच्यपरिवर्तनं कुरूत – (कोऽपि द्वे) 1×2=2

(i) छात्रः ग्रन्थं पठति। (कर्मवाच्ये)

(ii) त्वया सत्यं कथितम्। (कर्तृवाच्ये)

(iii) काकः पिकस्य संततिं पालयति। (कर्मवाच्ये)

18 अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 3

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।

**प्रश्नाः** –

(i) निर्धनो जनः किम् उपार्जितवान्?

(ii) सः कुत्र सफलो जातः?

(iii) तत्तनयः कस्मिन् संलग्नः समभूत?

**अथवा**

पञ्चोत्तर – द्विसहस्रतमे ख्रीष्टाब्दे (2005 ईस्वीये वर्षे) अपि कश्मीर – प्रान्ते पाकिस्तान–देशे च धरायाः महत्कम्पनं जातम्। यस्मात्कारणात् लक्षपरिमिताः जनाः अकालकालं कवलिताः। पृथ्वी कस्मात्प्रकम्पते इति विषये वैज्ञानिकाः कथयन्ति यत् पृथिव्या अन्तर्गर्भे विद्यमानाः बृहत्यः पाषाण–शिलाः यदा संघर्षणवशात् त्रुट्यन्ति तदा जायते भीषणं संस्खलनम्, संस्खलनजन्यं कम्पनञ्च। तदैव भयावहकम्पनं धरायाः उपरितलमप्यागत्य महाकम्पनं जनयति येन महाविनाशदृश्यं समुत्पद्यते।

**प्रश्नाः** – https://www.mpboardonline.com

(i) कश्मीर–प्रान्ते कदा धरायाः महत्कम्पनं जातम्?

(ii) कति जनाः अकालकालं कवलिताः?

(iii) पृथ्वी कस्मात्प्रकम्पते इति विषये के कथयन्ति?

19 अधोलिखितम् पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 3

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
    बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः
    करी च सिंहस्य बलं न मूषकः॥

**प्रश्नाः** –

(i) गुणी किं वेत्ति?

(ii) बली किं वेत्ति?

(iii) पिको कस्य गुणं वेत्ति?

**अथवा**



https://www.mpboardonline.com

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।
शुचि – पर्यावरणम्॥

**प्रश्नाः –**

(i) शतशकटीयानं किं मुञ्चति?

(ii) का संधावति?

(iii) वाष्पयानमाला कथं संधावति?

3

20 अधोलिखितम् नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

रामः – अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?

विदूषकः – (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी?

लवः – तस्याः द्वे नामनी?

विदूषकः – कथमिव?

लवः – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

**प्रश्नाः –**

(i) मातरमनयोनमिं कः वेदितुम् इच्छति?

(ii) कस्याः द्वे नामनी?

(iii) के देवी इति नाम्नाह्वयन्ति?

**अथवा**

सिंहः – तूष्णीं भव भोः। युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यते अत एव विचारविमर्शः प्रचलितः।

बकः – सर्वथा सम्यगुक्तम् सिंहमहोदयेन। वस्तुतः एव सिंहेन बहुकालपर्यन्तंशासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति।

सर्वेपक्षिणः– (उच्चैः) आम् आम्–कश्चित् खगः एव एव वनराजः भविष्यति इति।

**प्रश्नाः –**

(i) वन्यजीवाः किं रक्षकपदयोग्यं न मन्यते?

(ii) केन बहुकालपर्यन्तं शासनं कृतम्?

(iii) खगः एव कः भविष्यति इति?



https://www.mpboardonline.com

21 अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – (कोऽपि चत्वारि) 4

हरियाणाराज्ये यमुनानगरमण्डले एकः संस्कृतपरिवारः अस्ति। तस्मिन् गृहे सर्वे संस्कृते सम्भाषणं कुर्वन्ति। तत्र पशवोऽपि संस्कृतम् अवबोद्धुं समर्थाः सन्ति। तस्मिन् गृहे अभिमन्युः नाम एकः युवकः अस्ति। सोऽपि संस्कृतं वदति। एकदा तत्र एकः संस्कृत–प्राध्यापकः आगतवान्। तेन सह अभिमन्युः संस्कृतेन सम्भाषणं कृतवान्। तस्य युवकस्य प्रतिभां दृष्ट्वा प्राध्यापकः अभिमन्यवे शतं रूप्यकाणि दत्तवान्। तस्मात् दिनात् तस्य मनसि संस्कृतं प्रति महती अभिरुचिः समुत्पन्ना। सः प्रतिदिनं गीतायाः श्लोकान् पठित्वा – पठित्वा सर्वान् श्लोकान् अस्मरत्।

**प्रश्नाः –**

(i) संस्कृतपरिवारः कुत्र अस्ति?

(ii) प्राध्यापकः कस्मै शतं रुप्यकाणि दत्तवान्?

(iii) प्राध्यापकः अभिमन्यवे शतं रुप्यकाणि किमर्थं दत्तवान्?

(iv) युवकः कथं गीतायाः श्लोकान् अस्मरत्?

(v) गद्यांशस्य उचितं शीर्षकं लिखत।

22 स्वप्राचार्यस्यकृते त्रयदिवसानाम् अवकाशार्थम् एकं प्रार्थनापत्रम् लिखत। 4

**अथवा**

स्वभगिन्याः विवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रं लिखत।

23 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – 4

(i) पर्यावरणम्।

(ii) कविः कालिदासः।

(iii) अस्माकं देशः।

(iv) दूरदर्शनम्।



https://www.mpboardonline.com